दशमः पाठः

# संस्कृतेन जीवनम्

एहि मित्र हे सुधीर
त्वां विचिन्तये सदा।
इह सखे समं मया हि
खेल नन्द सन्ततम्॥

संस्कृतेन खेलनम्
कुर्महे सखे चिरम्।
तेन वाग्विवर्धनं
प्राप्नुयाम सत्वरम्॥

संस्कृतेन लेखनं
सर्वबालरंजकम्
तेन शब्दरूपसिद्धि –
राप्यते सखे वरम्॥

संस्कृतेन भाषणं
सर्वगर्वनाशकम्।
तेन रंजिता भवन्ति
सर्वदेवदेवताः॥

संस्कृतेन चिन्तनं
सद्गुणाभिवर्धनम्।
तेन मानसं सखे
स्यात् सदा सुखान्वितम्॥

## अभ्यासः

1. संस्कृतेन कथं जीवनम् अस्ति?
2. संस्कृतभाषायां वाग्विवर्धनं केन भवति?
3. संस्कृतेन लेखनेन, भाषणेन, चिन्तनेन च कानि-कानि भवन्ति?

★★★